संस्कृत.

क्र. १-[illegible]

कथा ~~यात्रिक.~~

# प्रातिवार्षिकपूजा कथासंग्रह.

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

४१०|पु. ३९

॥ श्रीः ॥

# ॥ प्रातिवर्षिकपूजाकथासंग्रहः ॥

## द्वितीयो भागः

सकलास्तिकजनोपकाराय पौराणिकोपाह्व

नानाशास्त्रिकृतः

रिसबुडोपाह्वबालकृष्णसूनु

मोरेश्वरशर्मणा

काश्यां

अमरनाम्नि यन्त्रालये मुद्रयित्वा

प्रकाशितः

Joint project of the Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

संवत् १९४२ मि: आश्विनवद्य ५ बुध सन् १८८५ ई०

यह पुस्तक रजस्टर हुवा है

ठि० बनारस दुर्गाघाट शुंढ्याविनायक के गली में

॥ श्रीः ॥

# ॥ उपोद्घातः ॥

इहकिलसन्ति यद्यपि प्राचीनप्रामाणिकविद्वद्वरनि र्मिता भूयांसो निबन्धा येषु तिथिविशेषादिकृत्या नि विस्तरेणन्यरूप्यन्त, तथापितेषामेकैकमेवाति विस्तृततया सांप्रतिकानामलस्योपहतचेतसाम ल्पमतीनां दुरधिगमं व्ययाधिक्यसंग्राह्यसंग्रहं च न चैकमात्रे संगृहीते निबन्धेसाम्प्रत मस्मासु प्रचरि तानां प्रातिवार्षिकसकलपूजाकथादीनां ग्रन्थान्तरग वेषणनैरपेक्ष्येणकृत्स्नमावेनाक्षमः संभवतिन च श क्यते सर्वनिबन्धसंग्रहः सर्वैः संपादयितुमितिव्रतरा जव्रतकौमुदीनिर्णयसिन्धुधर्मसिन्धुप्रभृतिनिबन्धा न्समाहृत्य तेभ्योऽस्मदाद्यनुष्ठीयमानं प्रातिवर्षिकपू जाकथादिभागमेकी कृत्यसंयोज्यचतत्रतत्स्थलेषुतत्त दुचितसंकल्पवाक्यानि, क्रियमाणोऽयंलघुतरोनिब न्धोऽन्यनैरपेक्ष्येणसकलकार्यनिर्वाहक्षमः सुकरसंग्रह श्च नव्यर्थतांगच्छेदित्याशासे । प्रार्थयेचविद्वद्वरा न् प्राथमिक रचना गोचरोऽत्रबुध्यपराध जनिता निस्खलितानिसोढुंपूरयितुंचन्यूनांशान्भगवतंश्री काशीविश्वेश्वरंनिष्प्रत्यूहमेतत्प्रचारणायेति । शम्

॥ पौराणिकाख्यनानाशास्त्री ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

॥ भा०॥
॥ २ ॥

॥ श्रीः ॥

## ॥ अनुक्रमणीका ॥


| प्रकरणानि | पृष्ठ | प्रकरणानि | पृष्ठ |
|---|---|---|---|
| मंगलाचरणं | १ | चंद्रार्घ्यदानविधिः | ११ |
| ॥ चैत्रमासः ॥ | २ | वटसावित्रीकथा | १३ |
| ब्रह्मध्वजपूजनं | २ | ॥ आषाढमासः॥ | २४ |
| संवत्सरमुहूर्ताः | २ | विष्णुशयनोत्सवः | २४ |
| गौर्यांदोलोत्सवः | ३ | चातुर्मास्यव्रतारंभस | २४ |
| दमनकसमर्पणविधिः | ३ | तिथिपालनव्रतं | २५ |
| अशोककलिकाप्राशन विधिः | ४ | गोपद्मव्रतविधिः | २५ |
| | | अमायांदीपपूजनं | २८ |
| ॥ वैशाखमासः ॥ | ४ | ॥ श्रावणमासः॥ | २८ |
| वैशाखस्नानसंकल्पः | ४ | ( रविवासरे ) | |
| अक्षय्यतृतीयानिमित्त | ४ | सूर्यपूजाविधिः | २८ |
| उदकुंभदानविधिः | | ( सोमवासरे ) | |
| ॥ ज्येष्ठमासः ॥ | ५ | शिवपूजाविधिः | २९ |
| दशहरानिमित्तस्नान पूजनविधिः | ५ | षोडशसोमवारव्रतारंभकालःपूजनविधिः | ३२ |
| निर्जलानिमित्तशर्करायुक्तउदकुंभदानविधिः | ५ | षोडशसोमवारकथा | ३२ |
| वटसावित्रीव्रतनिर्णयः | ६ | शिवामुष्टिव्रतविधिः | ४२ |
| व० त्रिरात्रव्रतसंकल्पः | ६ | ( मंगलवासरे ) | |
| वटसावित्रीपूजाविधि | ७ | मंगलागौरीव्रतग्रहण | ४२ |


Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

॥ भा० ॥
॥ ३ ॥


| | | | |
|---|---|---|---|
| मंगलागौरीपूजावि० | ४३ | षपूजनविधिः | |
| मंगलागौरीकथा | ४८ | पिठोराउमामहेश्वर | ८७ |
| (बुधगुरुवासरे,) | | पूजनविधिः | |
| बुधगुरुपूजाविधिः | ५३ | ॥भाद्रपदमासः॥ | ८८ |
| ( भृगुवासरे ) | | हरितालिकापूजा | ८८ |
| जीवंतिकापूजावि० | ५३ | हरितालिकाकथा | ९३ |
| वरलक्ष्मीपूजावि० | ५४ | सिद्धिविनायकपूजा | १०२ |
| ( शनिवासरे ) | | पुरुषसूक्तन्यासाः | १०३ |
| नृसिंहपूजाविधिः | ५८ | सि०प्राणप्रतिष्ठावि० | १०४ |
| शनिपूजाविधिः | ५९ | आरतीगणपतीची | १०९ |
| हनुमत्पूजाविधिः | ६० | सि०उत्तरपूजनं | १११ |
| नागपूजाविधिः | ६१ | चंद्रदर्शननिषेध,प | १११ |
| सूपौदनदानविधिः | ६३ | रिहारश्लोक | |
| दध्योदनदानवि० | ६४ | स्यमंतकोपाख्यानं | १११ |
| पवित्रारोपणवि० | ६५ | ऋषिपंचमीपूजावि | १२० |
| सभादीपदानवि० | ६६ | ऋषिपंचमीकथा | १२५ |
| रक्षाबंधनमंत्रः | ६८ | सूर्यषष्ठी० | १३१ |
| गोकुलाष्टमीपूजा | ६८ | मुक्ताभरणपूजा | १३१ |
| अष्टोत्तरशतनामाव | ७१ | मुक्ताभरणकथा | १३२ |
| जन्माष्टमीकथा | ७६ | ज्येष्ठावाहनपूजन | १३६ |
| पिठोराव्रतविधिः | ८० | षोडशदिनात्मकम | १३९ |
| चतुःषष्टीपूजनवि० | ८० | हालक्ष्मीव्रतारंभपू | |
| पिठोराव्रतकथा | ८४ | जनवि० | |
| पिठोराव्रतांगगोवृ | ८७ | म०दोरकपूजनवि० | १४० |


Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)

॥ भा० ॥ ॥ ४ ॥


| | | | |
|---|---|---|---|
| कृष्णाष्टम्यांमहाल | १४० | शिक्यदानविधिः | १७१ |
| क्ष्मीपुजनविधिः | | वामनपूजाविधिः | १७२ |
| लक्ष्मीसूक्तन्यासाः | १४१ | श्रवणद्वादशीकथा | १७६ |
| आरतीलक्ष्मीची | १४६ | अनंतपूजाविधिः | १८३ |
| महालक्ष्मीकथा | १४९ | अनंतअष्टोत्तरश | १९६ |
| दूर्वाष्टमीपूजावि० | १५९ | तनामावली | |
| अदुःखनवमीपूजा | १६१ | अनंतकथा | १९९ |
| अदुःखनवमीकथा | १६४ | कपिलाषष्ठीयोगः | २०७ |
| विष्णुपरिवर्तनावि० | १६९ | क०स्नानसूर्यपूजन | २०८ |
| श्रवणद्वादश्यांजना | १६९ | कपिलादानविधिः | |
| र्दनपूजाविधिः | | | |


" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीसंकष्टनाशिन्यै नमः ॥

श्रीलक्ष्मीकेशवौनत्वागणेशानंसरस्वतीम् ।
अन्नपूर्णांविश्वनाथौगंगाभैरवषण्मुखान् ॥ १ ॥
ध्यात्वाचसंकटांदेवींवीरेश्वरसमन्विताम् ।
तातंविनायकंपूज्यंलक्ष्मीदांमातरंसतीम् ॥ २ ॥
बालशास्त्रिगुरूंश्चापिनत्वातत्कृपयाऽधुना ।
प्रातिवार्षिकपूजायाःकथायाश्चैवसंग्रहः ॥ ३ ॥
संक्षेपान्नित्यकृत्यस्यविधेश्चापिप्रदर्शनम् ।
तत्तत्पूजादिनस्यापिनिर्णयःक्रियतेमया ॥ ४ ॥
पौराणिकेत्युपाह्वेनरामचंद्रेणशर्मणा ।
नानाशास्त्रीतिख्यातेनबालबोधार्थमेवहि ॥ ५ ॥

अस्तियद्यप्यनेकेषुव्रतराजनिर्णयसिंधवादिप्रभृति ग्रंथेषुपूजाकथासंग्रहस्तथाप्यल्पबुद्धीनामालस्ययु- तानामनेकग्रंथावलोकनासमर्थानांजनानामुपकारा यरच्यमानोयंलघुतरोग्रंथः सर्वानानंदयत्वितिबद्धां जलिपुटोनक्तंदिवं परमेश्वरंप्रार्थयते ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(7)

## ॥ अथ चैत्रमासः ॥

मध्यदेशेऽमांतएवमासःसर्वकृत्येषु । माघकार्तिक
वैशाखस्नानेषुतुपूर्णांतएवेतिसर्वसिद्धांतः। तत्रशुक्लप्र
॥ २ ॥ तिपद्सूर्योदयव्यापिनी ग्राह्यादिनद्वयेतद्याप्तावव्या
प्तौवापूर्वैव,तस्यांब्रह्मध्वजपूजनंतच्चेत्थंप्रातस्तैलाभ्यं
गपूर्वकंमंगलस्नानंविधाय कृतनित्यक्रियोनूतनव
स्त्रालंकारभूषितोगृहद्वारप्रदेशेपुष्पमालाभूषितमार
क्तवस्त्रनिर्मितं ध्वजमुच्छ्रित्यदेशकालौस्मृत्वा० प्रा
प्त्यर्थंममसकुटुंबस्य सपरिवारस्यायुरारोग्यपुत्रपौ
त्राद्यैश्वर्याभिवृद्ध्यर्थं संवत्सरारंभेब्रह्मध्वजपूजनमहं
करिष्ये। ओंब्रह्मध्वजायनमइति नाममंत्रेण षोड
शोपचारैः संपूज्यप्रार्थयेत् । ब्रह्मध्वजनमस्तेस्तुस
र्वाभीष्टफलप्रद । प्राप्तेस्मिन्वत्सरेनित्यंमद्गृहेमंग
लंकुरु ॥ इति संप्रार्थ्य अनेनब्रह्मध्वज० प्रीयताम् ।
ततआरोग्यर्थंवा....निंबपत्राणिभक्षयित्वादैवज्ञंसंपू
ज्यतन्मुखाद्वत्सरफलपूर्वकंपंचांगंश्रुत्वातंदक्षिणादि
भिःपरितोष्यविप्रसुहृद्युतोमधुरमन्नंभुंजीयादिति।
अस्यामेव नवरात्रारंभः । संवत्सरेसार्धत्रयोमुहूर्ता
स्तेच । प्रतिपद्वत्सरादिर्या तृतीयाक्षय्यसंज्ञिका ।
दशमीविजयाख्याचमुहूर्तास्त्रयईरिताः । प्रतिपत्का
र्तिकेशुक्लासमुहूर्तोर्धसंज्ञकः । स्वयंसिद्धाइमेज्ञेयाः
सर्वकार्यप्रसाधकाः ॥ इति वाराहसंहितायांदर्शना
त्सर्वकार्यारंभोत्रशुभप्रदः ॥

चैत्रशुक्लतृतीयायांगौरीपूजनंतृतीयाचमुहूर्तमा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

त्रापिपराग्राह्या गौरीदेवत्यात् । मासपर्यंतमांदो लनमपिकार्यं । देशकालौस्मृत्वा० प्राप्त्यर्थमखंडित सौभाग्यपुत्रपौत्राद्यभिवृद्ध्यर्थं चैत्रशुक्लतृतीयामार भ्यवैशाखशुक्लतृतीयापर्यंतप्रत्यहंगौरीपूजनंदोलोत्स वंचकरिष्ये । तत्राद्यगौर्याःस्थापनपूजनादिकरिष्ये कुंकुमागरुलिप्तांगांसर्वाभरणभूषितां । नीलकंठप्रि यांगौरींवंदेहंमंगलाभिधां । श्रीगौर्यैनमइतिध्याना दिषोडशोपचारैःसंपूज्य प्रार्थयेत् । पुत्रान्देहिधनं देहिसौभाग्यंदेहिमंगले । अन्यांश्चसर्वकामांश्चदेहिदे विनमोस्तुते । ततःसुवासिनींपूजयित्वातस्यैखाद्या दिवाणकंदद्यादित्याचारः । अनेनमयाकृतेनपूज० गौरीप्रीयतां ॥

अथ दमनकसमर्पणविधिः ॥

यस्यदेवस्ययोभक्तः सोर्पयेद्देवतातिथौ । सर्वेषां यदिभक्तश्चेत्सर्वांस्त्वपिसमर्पयेत् । समर्पणदिनात्पूर्वे द्युर्दमनकमानीय प्रक्षाल्यवस्त्राच्छादितंदेवागारेनि धायापरेद्युः कृतनित्यक्रियोदेशकालौसंकीर्त्यमया कृतायांसंवत्सरावधि अमुकदेवतापूजायां न्यूनाति रेकादिजनितवैगुण्यपरिहारपूर्वकसंपूर्णपूजाफलप्रा प्तिद्वाराश्रीप०अमु०दमनार्पणंकरिष्ये । इतिसंकल्प्य देवंविविधोपचारैः संपूज्यसचंदनंदमनकमादाय दे वतानाममंत्रेणसमर्प्य प्रार्थयेत् । जानताऽजानतावा पिमत्कृतंयन्नवार्चनं । तत्सर्वंपूर्णतांयातुत्वत्प्रसादा त्सुरेश्वर । ततः पूजावशिष्टंदमनकंगुरुविप्रादिभ्यो

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

9)

दत्वास्वयंप्रसादबुद्ध्याधृत्वा यथाशक्तिब्राह्मणान्भोजयेत् ॥

अष्टम्यामशोककलिकाप्राशनं। ममसर्वदाऽशोकत्व
॥ ४ ॥ प्राप्तिद्वाराश्री०र्थं चैत्रशुक्लाष्टम्यामष्टाशोककलिका
प्राशनंकरिष्ये,इतिसंकल्प्यमंत्रस्तु।त्वामशोकहराभीष्टंमधुमाससमुद्भवं। पिबामिशोकसंतप्तोमामशोकं सदाकुरु ॥ इदंकाम्यं।

॥ अथ वैशाखमासः ॥

तत्रादौवैशाखस्नानं तत्प्रारंभकालश्चैत्रशुक्लैकादश्यां पौर्णमास्यांमेषसंक्रमणेवा।तत्रादौसंकल्पमंत्रः वैशाखंसकलंमासंमेषसंक्रमणेरवेः। प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः। मधुहंतुःप्रसादेनब्राह्मणानामनुग्रहात्। निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहं माधवेमेषगेभानौमुरारेमधुसूदन। प्रातःस्नानेनमेनाथफलदोभवपापहन्। अयंमंत्रः प्रथमदिनएव। देशकालौस्मृत्वाममानेकजन्मार्जितसमस्तपापक्षयपूर्वकश्रीमधुसूदनदेवताप्री० अमुकतीर्थेस्नानम०। अशक्तंप्रतिदिनत्रयंस्नानंतत्रप्रथमदिने ऽयंमंत्रः। त्रयोदश्यांचतुर्दश्यांवैशाख्यांच दिनत्रयं। प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः ॥

वैशाखशुक्लतृतीयाऽक्षय्यतृतीयातस्यामुदकुंभदानविधिः। देशकालौ०र्थमक्षय्यपितृतृप्तिपूर्वकशिवलोकमहीयमानत्वसिद्धि० श्री०ब्राह्मणायउदकुंभदानंकरिष्ये,कुंभंविप्रंचसंपूज्य एषधर्मघटोदत्तोब्रह्मवि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

घ्नुशिवात्मकः । अस्यप्रदानात्तृप्यंतुपितरोपिपिता
महाः । गंधोदकतिलैर्मिश्रंसान्नंकुंभंफलान्वितं ।
॥ ५ ॥ पितृभ्यःसंप्रदास्यामिह्यक्षय्यमुपतिष्ठतु । इतिमंत्रा
भ्यांदत्वा अनेनउद०पितरः प्रीयंतां ॥

॥ अथ ज्येष्ठमासः ॥

ज्येष्ठशुक्लदशमीदशहरा । तत्रदशयोगाउक्ताः।ज्ये
ष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः । गरानंदेव्य
तीपातेकन्याचंद्रेवृषेरवौ । दशयोगेनरः स्नात्वास
र्वपापैः प्रमुच्यते । ज्येष्ठेमलमासेसतितत्रैवदशह
राकार्यानतुशुद्धेइतिसकलसिद्धांतः। शुद्धेपिकर्तव्य
मितिकेचित् । अत्रगंगास्नानपूजनयदिअवश्यंकार्यं
गंगायाअलाभेनद्यंतरेपि गंगांध्यात्वास्नानपूजादि
कार्यं। देश०ममइहजन्मार्जितदशविधपापक्षयपूर्व
कविष्णु० प्राप्त्यर्थंअमु०नद्यांस्नानंपूजनंचकरिष्ये ।
ओंनमःशिवायै नारायण्यै दशहरायैगंगायै नमो
नम इतिमंत्रेण पूजनंकार्यं । दशपापान्युक्तानि ।
अदत्तानामुपादानंहिंसाचैवाविधानतः । परदारो
पसेवाचकायिकंत्रिविधंस्मृतं । पारुष्यमनृतंचैवपै
शून्यंचापिसर्वशः । असंबद्धप्रलापश्चवाङ्मयंस्याच्च
तुर्विधं । परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं । वित
थाभिनिवेशश्चमानसंत्रिविधंस्मृतं एतानिदशपापा
॥ ६ ॥ निहरत्वंममसर्वदा ॥

ज्येष्ठशुक्लैकादशीनिर्जला । तस्यांनिर्जलमुपोषणं
कृत्वाशर्करायुक्तं जलकुंभदानंविहितं । तद्यथा ।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

देश० प्राप्त्यर्थंनिर्जलैकादशीनिमित्तं श्रीमहाविष्णु
प्री० शर्करायुक्तजलकुंभदानंकरिष्ये । तदंगं कुंभ
पू०ब्राह्मणपू०करि० कुंभदेवताभ्योनमइतिगंधा०
पूज० ब्राह्मणंसंपू० महाविष्णुस्वरू०ब्राह्मणाय इद
मासनं०इत्यादि स्वस्त्यस्तु। दानमंत्रः । देवदेवहृ
षीकेश संसारार्णवतारक । उदकुंभप्रदानेनयास्या
मिपरमांगतिं। इमंशर्करायुक्तमुदकुंभममुकश०संप्र
ददेदान०दक्षिणां० प्रति०प्र० अनेन० महाविष्णुः
प्रीयताम् ॥

ज्येष्ठशुक्लपूर्णिमायांवटसावित्रीव्रतं। दाक्षिणात्या
स्त्वस्यामिवकुर्वंतिपाश्चात्यास्त्वमावास्यायाम्। अत्र
व्रतेत्रयोदश्यादिदिनत्रयमुपवासः। अत्रपूर्णिमानि
र्णयानुसारेणयथात्रिरात्रंभवेत् तथात्रयोदश्यादिदि
नत्रयंग्राह्यं। पूर्णिमातुसूर्यास्तमयात्पूर्वंत्रिमुहूर्ताधिक
व्यापिनीचतुर्दशीविद्धाग्राह्या। त्रिमुहूर्तन्यूनत्वेपरैव
यत्तुअशक्तौकेवलपूर्णिमायामेव पूजनमुपवासंचसर्व
त्रस्त्रियः कुर्वंत्याचारात्तत्तुपरपूर्णिमायामेवकर्तव्यं ।

॥ अथ त्रिरात्रव्रतसंकल्पः ॥

वटसमीपेगत्वा आचम्यतिथ्यादिसंकीर्त्यममभर्तुःपु
त्राणांचायुरारोग्यप्राप्तये जन्मजन्मन्यवैधव्यप्राप्त
येचसावित्रीव्रतमहंकरिष्ये। नियममंत्रः। त्रिरात्रंलं
घयित्वातुचतुर्थेदिवसेत्वहं। चंद्रायार्घ्यंप्रदत्वाचपू
जयित्वाक्रतांसती। मिष्टान्नानियथाशक्त्याभोजयि
त्वाद्विजोत्तमान्। भोक्ष्येहंतुजगद्धात्रिनिर्विघ्नंकुरुमे

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12)

॥ ७ ॥

शुभे। ततःकलशस्थापनं। गृहेलिखितवटसमीपे भू
मिंगोमयेनोपलिप्यरंगवल्यादिभिरलंकृत्य महीद्यौरि
त्यादिकलशंसंस्थाप्य तदुपरिवंशपात्रंनिधायतत्सभी
पेसप्रधान्यानि पृथक्पृथक्स्थापयित्वातदुपरिवस्त्रं
निधायतस्योपरिब्रह्मणासहितांहैमींसावित्रीप्रतिमां
सांगांसपरिवारांस्थापयेत्। अथपूजाविधिः। आचम्य
वटसिंचामितेमूलं सलिलैरमृतोपमैः। सुखिनंकुरु
मांनाथपतिपुत्रसमन्वितां। सूत्रेणवेष्टयेद्भक्त्यागंधपु
ष्पाक्षतैःशुभैः। ममसंतानवृद्धिंचकुरुत्वंवटनायक।
इतिसूत्रेणवटंवेष्टयेत्। ततःदेशकालौस्मृत्वाममेह
जन्मनिजन्मांतरेच भर्तुःपुत्राणामायुरारोग्यधनसंप
दादिप्राप्तये अवैधव्यप्राप्तयेवसावित्रीव्रतप्रधानत्वे
नविहितंब्रह्मणासहसावित्रीसत्यवद्यमनारदपूजनम
हंकरि० आदौनिर्विघ्नता० गणपति०कलशपूजना
दिविधाय अपवित्रः०इतिपूजासंभारान्प्रोक्ष्य। अ
थ ध्यानं। पद्मपत्रसमासीनंब्रह्माणंचचतुर्मुखं। उप
वीतधरंदेवंसाक्षसूत्रकमंडलुं। वामोत्संगगतातस्य
सावित्रीब्रह्मणः प्रिया। आदित्यवर्णांधर्मज्ञांसाक्ष
मालाकरांतथा। धर्मराजंपितृपतिंभूतानांकर्मसा
क्षिणं। कालदंडधरंदेवंमहिषारूढमेवच। चिंतया
मिचदेवेशंसर्वप्राणिहितायवै। वीणांदधानंदेवर्षिं
नारदंचिंतयाम्यहं। ध्यानं०। ब्रह्मणासहितांदेवीं
सावित्रींलोकमातरं। नारदंसत्यवंतंचयमंचावाहया
म्यहं। आवाहनं०। ब्रह्मणासहसावित्रिसत्यवत्साहि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

तेप्रिये । हेमासनंगृह्यतांमेधर्मराजसुरेश्वर । आस
नं० । गंगाजलंसमानीतंपाद्यार्थंब्रह्मणः प्रिये । भ
क्त्यादत्तंधर्मराजसावित्रिप्रतिगृह्यतां । पाद्यं०।भक्त्या
समाहृतंतोयंफलपुष्पसमन्वितं । अर्घ्यंगृहाणसावि
त्रिममसत्यव्रतप्रिये । अर्घ्यं० ॥ सुगंधिसहकर्पू
रसुरभिस्वादुशीतलं । पत्यासहत्वंसावित्रिकुरुष्वाच
मनीयकं । आचमनीयं० पयोदधिघृतंचैवशर्कराम
धुसंयुतं । पंचामृतंमयानीतंस्वीकुरुष्ववरानने । पं
चामृतस्नानं० । अभ्यंगार्थंमयानीतंतैलंपुष्पादिवा
सितं । प्रयत्नेनार्चितंशुद्धंस्नानार्थंप्र० अभ्यंगस्नानं०
अंगोद्वर्तनकंदेवकस्तूर्याकुंकुमेनच । अन्यैःसुगंधद्र
व्यैश्चानिर्मितं प्रतिगृ० अंगोद्वर्तनंस० ॥ नानातीर्था
दाहृतंच तोयमुष्णंमयाकृतं ॥ स्नानार्थंचप्रयच्छामिगृ
ह्यतांपरमेश्वरि ॥ उष्णोदकस्नानंस० ॥ मंदाकिन्याः
समानीतमुदकंसत्यव्रतप्रिये ॥ सावित्रिधर्मराजत्वं
स्नानार्थंप्रतिगृह्यतां ॥ स्नानं० ॥ स्नानानंतरेणआ
चमनीयं० पंचोपचारपूजांकृत्वा अभिषेकंकुर्यात् ।
सुरास्त्वा०* ॥ सूक्ष्मतंतुमयंवस्त्रं युग्मंकार्पाससं
भवं ॥ सावित्रिसत्यवत्कांतभक्त्यादत्तंप्रगृह्यतां ॥ व
स्त्रं०॥ सावित्रिसत्यवत्कांतेधर्मराजसुरेश्वर ॥ सावि
त्रिब्रह्मणासार्द्धमुपवीतंप्रगृह्यतां ॥ यज्ञोपवीतं० ॥
भूषणानिचदिव्यानिमुक्ताहारयुतानिच ॥ त्वदर्थमुप
क्लृप्तानिगृहाणशुभलोचने ॥ भूषणानिस० ॥ हरिद्रा

* इत्यादिमंगलागौरीपूजायांलिखितंद्रष्टव्यं ।

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

रंजितेदेविहरिद्रांसर्वकामदां ॥ सावित्रितेमयादत्तां
त्वंगृहाणशुचिस्मिते ॥ हरिद्रांस० ॥ कुंकुमेनार्चितेदे
॥ ९ ॥ विसर्वान्कामान्प्रयच्छमे ॥ अतस्त्वामर्चयिष्यामिकुं
कुमेनसुमध्यमे ॥ कुंकुमंस० ॥ अंजनेनांजितादेवीच
क्षुषोः प्रतिवासरं । कज्जलंतेमयादत्तंचक्षुर्भ्यांप्रति
गृह्यतां ॥ कज्जलंस० ॥ कुंकुमागरुकर्पूरकस्तूरीरोच
नायुतं ॥ चंदनंतेमयादत्तंसावित्रिप्रतिगृ० चंदनंस० ॥
अक्षताश्चसुरश्रेष्ठाःकुंकुमाक्ताःसुशोभनाः ॥ मयानिवे
दिताभक्त्यागृहाणपरमेश्वरि ॥ अक्षतान्स० ॥ ना
नापरिमलद्रव्यंचूर्णीकृत्यसमर्पितं ॥ भक्त्यादेविमया
दत्तंसावित्रिप्र० नानापरिमलद्रव्यंस० ॥ माल्यादी
निसुगंधीनिमालत्यादीनिवैप्रभो । मयाहृतानिपूजा
र्थंपुष्पाणि प्रतिगृ० पुष्पाणि० ॥

॥ अथांगपूजा ॥

| | |
|---|---|
| १ सावित्र्यैनमः पादौपूजयामि | २ प्रसावित्र्यैनमः जंघेपूजयामि ॥ |
| ३ कमलपत्राक्ष्यै० कटीपूज० | ४ भूतधारिण्यै० उदरंपूज० ॥ |
| ५ गायत्र्यै० कंठंपू० | ६ ब्रह्मणः प्रियायै०मुखंपूज० ॥ |
| ७ सौभाग्यदात्र्यै० शिरःपूज० | ॥ ब्रह्मसत्यवतोः पूजा ॥ |
| ८ धात्रेनमः पादौपूजया० | ९ विधात्रेनमः जंघेपूज० ॥ |
| १० त्वष्ट्रेनमः ऊरूपूजया० | ११ प्रजापतयेन मेंढ्रंपूज० ॥ |
| १२ परमेष्ठिने० कटीपूजया० | १३ अग्निरूपाय० नाभिंपूज० ॥ |
| १४ पद्मनाभाय० हृदयंपूज० | १५ वेधसेनमः बाहूपूज० ॥ |
| १६ विधयेनमः कंठंपूज० | १७ हिरण्यगर्भा० मुखंपूज० ॥ |
| १८ ब्रह्मणेनमः शिरःपूज० | १९ विश्ववेन० सर्वांगंपूज० ॥ |

देवद्रुमरसोद्भूतःकालागरुसमन्वितः ॥ आघ्रेयताम
यंधूपःसावित्रिप्रतिगृ० धूपं० चक्षुर्दंसर्वलोकानांतिमि

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

१५८

॥ १० ॥

रस्यनिवारणं । आर्तिक्यंकल्पितंभक्त्या गृहाणपरमे
श्वरि० दीपंदर्श०॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःस
मन्वितं॥दुग्धदध्याज्यसंयुक्तंनैवेद्यंप्र०नैवेद्यं०॥आच
मनं०॥करोद्वर्तनं०॥इदंफलंमयादेवस्थापितंपुरतस्त
व॥तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥फलंस०
पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं॥कर्पूरैलासमायु
क्तंतांबूलंप्र०।तांबूलं० हिरण्यगर्भगर्भस्थंहेमबीजंवि
भावसोः।अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥दक्षि
णां०॥ चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच ॥ त्वमे
वसर्वज्योतींषिआर्तिक्यंप्र० आर्तिक्यदीपं०॥ कर्पूर
दीपं०॥यानिकानिचपापानिजन्मांतरकृतानिच।ता
नितानिविनश्यंतिप्रदक्षिणपदेपदे ॥प्रदक्षिणां० ॥
सावित्रिचप्रसावित्रिसततंब्रह्मणःप्रिये॥ पूजितासि
द्विजैःसर्वैःस्त्रीभिर्मुनिगणैस्तथा ॥ नमस्कारान्स०
त्रिसंध्यंदेविभूतानांवदनीयासिसुव्रते ॥ मयादत्ता
चपूजेयंत्वंगृहाणनमोस्तुते ॥ मंत्रपुष्पांजलिं० ॥
ततःफलहिरण्योदकगंधपुष्पसहितमर्घ्यत्रयंदद्यात् ॥
ओंकारपूर्वकेदेविसर्वदुःखनिवारिणि । देविमातर्न
मस्तुभ्यमवैधव्यंप्रयच्छमे ॥ पतिव्रतेमहाभागेवन्हि
जातेशुचिस्मिते ॥ दृढव्रतेदृढमतेभर्तुश्चप्रियवादि
नि ॥ अवैधव्यंचसौभाग्यंदेहित्वंममसुव्रते ॥ पुत्रा
न्पौत्रांश्चसौख्यंचगृहाणार्घ्यंनमोस्तुते । ब्रह्मणास
हसावित्र्यैनमःइदमर्घ्यंस० ॥ त्वंकर्मसाक्षीलोका
नांशुभाशुभविवेककृत् ॥ वैवस्वतगृहाणार्घ्यंधर्मरा

“Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.”

76)

जनमोस्तुते॥ यमायनमःइदमर्घ्यंस० ॥ नारायणन मस्तुभ्यंवीणावादनतत्पर । देवर्षेत्वंमहाभागत्वद्य ॥ ११ ॥ र्घोयंप्रतिगृ० ॥ नारदायनमःइदमर्घ्यंस०॥ प्रार्थना, त्वंगौरीत्वंशचीलक्ष्मीस्त्वंप्रभाचंद्रमंडले॥त्वमेवचज गन्मातामामुद्धरवरानने॥ सौभाग्यंकुलवृद्धिंचदेहित्वं ममसुव्रते ॥ दुष्कृतंभस्मवत्सर्वमवैधव्यंप्रयच्छमे ॥ अवियोगोयथादेवसावित्र्यासहितस्यते। अवियोग स्तथास्माकंभूयाज्जन्मनिजन्मनि । यमप्रार्थना ॥ कर्मसाक्षीजगत्पूज्यःसर्ववंद्यप्रसीदमे ॥ दिनत्रयव्रतं सर्वंपरिपूर्णंतदस्तुमे ॥ नारदप्रार्थना ॥ कलिप्रिय नमस्तेस्तुब्रह्मपुत्रप्रसीदमे ॥ तवप्रसादाद्देवर्षेव्रतंसं पूर्णमस्तुमे ॥ यस्यस्मृत्याचनामोक्त्यातपःपूजाक्रिया दिषु। न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं ॥ अनेन पूजनेनश्रीब्रह्मणासहसावित्रीदेवताप्रीयतां॥ अद्य० प्त्यर्थंपूजासांगतासिध्यर्थंब्राह्मणपूजनंवायनदानंच करिष्ये ॥ गंधाःपांतु० ॥ स्वस्त्यस्तुदी० फलवस्त्रस मायुक्तंसौभाग्यद्रव्यसंयुतं॥वंशपात्रेनिधायादौ ब्रा ह्मणायनिवेदयेत् ॥ उपायनमिदंतुभ्यंव्रतसंपूर्णहे तवे। वाणकंद्विजवर्यायसहिरण्यंददाम्यहं ॥ इदंसौ भाग्यवायनंदक्षिणाताम्बूलवस्त्रधान्यसहितंअमुकशर्म णेब्राह्मणायतुभ्यमहंसंप्रददे ॥ प्रति० ॥ दान० त्रिरात्रपूजनेरात्रौप्रतिपदि अरुंधतीसहितचंद्रायार्घ्यदानविधिः॥ आचम्य,अद्य०र्थं त्रिरात्रव्रतांगभूतं अरुंधतीसहितशशिदेवताप्रीत्यर्थं अर्घ्यदानंतदंग

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(17)

त्वेनपंचोपचारपूजनंचकरिष्ये ॥ अरुंधतीसहितश
शिदेवताभ्योनमः इतिमंत्रेण पंचोपचारपूजांकृत्वा
॥ १२ ॥ फलपुष्पगंधहिरण्ययुतमर्घ्यंदद्यात् ॥ अरुंधतिनम
स्तेस्तुवसिष्ठस्यप्रियेशुभे ॥ सर्वदेवनमस्कार्येपतिव्र
तपरायणे ॥ अर्घ्यमेतन्मयादत्तंफलपुष्पसमन्वितं ॥
पुत्रान्देहिसुखंदेहिगृहाणार्घ्यंनमोस्तुमे ॥ अरुंधत्यै
नमःइदमर्घ्यंस० ॥ क्षीरोदार्णवसंभूतअत्रिगोत्रस
मुद्भव ॥ गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशिन्
चंद्रमसेनमःइदमर्घ्यंसमर्पयामि ॥ अनेनअर्घ्यदाने
नअरुंधतीसहितशशिदेवताप्रीयताम् ॥ स्थापित
देवतानांउत्तरपूजनंपीठदानंचकरिष्ये, तदंगत्वेन
ब्राह्मणपूजनंकरिष्ये ॥ पंचोपचारैःउत्तरपूजांकत्वा
ब्राह्मणंसंपूज्य ॥ देवताविसृज्य, यांतुदेव० ॥ प्र
तिमासहितंपीठदानंकुर्यात ॥ दानमंत्रः,सावित्रीज
गतांमातासावित्रीजगतःपिता ॥ मयादत्ताचसावि
त्रीब्रह्मणासहगृह्यतां ॥ इदंपीठंसदक्षिणाकंसतांबूलं
अमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्र० । प्र० दानसां
गतासिध्यर्थंइमांदक्षिणांतुभ्यमहंसंप्रददे ॥ प्रतिग्र
हीतृमंत्रः॥मयागृहीतासावित्रीत्वयादत्तासुशोभने॥
यावच्चंद्रश्चसूर्यश्चसहभर्त्रासुखीभव ॥ कृतस्यकर्मणः
सांगतासिध्यर्थंयथाशक्तिदंपतीभोजयिष्ये ॥ यस्य
स्मृत्याच० ॥ अनेनत्रिरात्रव्रताख्येनकर्मणाश्रीब्रह्म
णासहसावित्रीदेवताप्रीयतां ॥-

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥ अथ सावित्रीकथाप्रारंभः ॥

सनत्कुमारउवाच कुलस्त्रीणांव्रतंदेवमहाभाग्यंतथैव
च अवैधव्यकरंस्त्रीणांपुत्रपौत्रप्रदायकं ईश्वरउवाच
॥ १३ ॥ आसीन्मद्रेषुधर्मात्माज्ञानीपरमधार्मिकः। नाम्नाचा
श्वपतिर्वीरोवेदवेदांगपारगःअनपत्योमहाबाहुःसर्वै
श्वर्यसमन्वितः। सपत्नीकस्तपस्तेपेसमाराधयतेन्नृपः
सावित्रींचप्रसावित्रींजपन्नास्तेमहामनाः । जुहोति
चैवसावित्रींभक्त्यापरमयायुतः। ततस्तुष्टातुसावित्री
सादेवीद्विजसत्तम। साविग्रहवतीदेवीतस्यदर्शनमा
गता। भूर्भुवःस्वरिवेत्येषासाक्षसूत्रकमंडलुःतांतुदृष्ट्वा
जगद्वंद्यांसावित्रींचनृपोत्तमः । प्रणिपत्यनृपोभक्त्या
प्रहृष्टेनांतरात्मना। तद्दृष्ट्वापतितंभूमौतुष्टादेवीजगाद
ह। सावित्र्युवाच। तुष्टाहंतवराजेंद्रवरंवरयसुव्रत। एव
मुक्तस्तयाराजाप्रसन्नांतामुवाचह अनपत्योह्यहंदेवि
पुत्रमिच्छामिशोभनेनान्यंवृणोमिसावित्रिपुत्रमेवज
गन्मये अन्यदास्तिसमग्रंमेक्षितौयच्चापिदुर्लभं प्रसादा
त्तवदेवेशितत्सर्वंविद्यतेगृहेएवमुक्तातुसादेवीप्रत्युवा
चनराधिपं। सावित्र्युवा०। पुत्रस्तेनास्तिराजेंद्रकन्य
कातेभविष्यति । कुलद्वयंतुसाराजन्नुद्धरिष्यतिभामि
नी। मन्नाम्नाराजशार्दूलतस्यानामभविष्यतिइत्युक्त्वा
तंमुनिश्रेष्ठराजानंब्रह्मणःप्रिया । अंतर्धानंगतादेवी
संतुष्टोसौमहीपतिः। ततःकतिपयाहोभिस्तस्यराज्ञी
महीभुजः । ससत्वासमजायेतपूर्णेकालेसुखावहे । सा
वित्र्यातुष्टयादत्तासावित्र्याजप्रयातथा । सावित्रीते

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(19)

नवरदातस्यानामवभूवह। राजतेदेवगर्भाभाकन्याक
मललोचना। तांदृष्ट्वाहेमगर्भाभांराजाचिंतामुपेयिवा
न्। अयाच्यमानांचवरैरूपेणाप्रतिमाभुवि। तस्यारू
॥ १४ ॥ पेणतेसर्वेसन्निरुद्धामहीभुजः ततःसराजाचाहूयउवा
चकमलेक्षणां। पुत्रिप्रदानकालस्तेनचयाचंतिकेचन
स्वयंवरयहृद्यंतेपतिंगुणसमन्वितं। मनःप्रल्हादकरणं
शीलेनाभिजनेनच। इत्युक्तातांचराजेंद्रोवृद्धामात्यैः
सहैवतु। वस्त्रालंकारसहितांधनरत्नैःसमन्वितां। वि
सृज्यचक्षणंतत्रयावत्तिष्ठतिभूमिपः। तावत्तत्रसमाग
च्छन्नारदोभगवान्ऋषिः। संपूज्यचततोराजाअर्घ्य
पाद्येनतंमुनिं। आसनेचसुखासीनःपूजितस्तेनभूभु
जा। पूजयित्वामुनिंराजाप्रोवाचेदंद्विजोत्तमं। पावि
तोहंत्वयाविप्रदर्शनेनाद्यनारद। यावदेवंवदेद्राजा
तावत्साकमलेक्षणा। आश्रमादागतादेवीवृद्धामात्यैः
समन्विता। अभिवाद्यपितुःपादौववंदेसामुनिंततः।
नारदेनतुदृष्टांतांदृष्ट्वाप्रोवाचभूमिपं। कन्यांचदेवग
र्भाभांकिमर्थंनप्रयच्छसि। वरायत्वंमहाबाहोवरयो
ग्यांहिसुंदरीं। एवमुक्तस्तदातेनमुनिनानृपसत्तमः।उ
वाचतंमुनिंवाक्यमनेनार्थेनप्रेषिता आगतेयंविशाला
क्षीमयासंप्रेषितासती। अनयाचवृतोभर्ताप्टच्छत्वंमु
निसत्तम। साप्टष्टातेनमुनिनातस्मैवाचष्टभामिनी।
सावित्र्युवाच। द्युमत्सेनस्यराज्यंवैवैरिणारुक्मिणाहृतं दैवा
दंधःस्त्रीसहितःसत्यवान्तत्सुतोवने। आश्रमेसत्यवा
न्नामद्युमत्सेनसुतोमुने। भर्तेतिमनसाविप्रवृतोसौरा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com